CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा. २०५५ ३२४२

नमेघप्रभ...
तीति भीर...
प्रतिग...
लि...

❀ श्रीः ❀

अथ

सरस्वती-कण्ठाभरणस्य

चित्र-प्रकरणमारभ्यते ।

प्रणम्य शिरसा कृष्णं जगतामादिकारणम् ।
वाक्कण्ठाभरणग्रन्थस्तस्य टीका विलिख्यते ॥१॥

वर्णस्थानस्वराकारगतिबन्धान् प्रतीह यः ।
नियमस्तद्बुधैः षोढा चित्रमित्यभिधीयते ॥ १ ॥

वर्णेति ॥ इह चित्रप्रकरणे । वर्णस्थानस्वराकारगतिबन्धान् वर्णाव्यञ्जनानि । स्थानं कण्ठताल्वादिः । स्वरा अकारादयः । आकारः पद्म द्याकृत्युन्मुद्रणम् । गतिः पाठितिभङ्गाविशेषः । बन्धो विचिढ़ितिप्रभृतिः । एतेषामितरेतरयोगस्तान् तथोक्तान् । प्रति यो नियमोव्रतः निश्चय इति यावत् । तद्बुधैः पण्डितैः षोढा चित्रमितिअभिधीयते कथ्यते । दधातेः कर्म्मणिलट् ॥

वर्णशब्देन चात्र स्वराणां पृथङ्निर्देशाद् व्यञ्जनान्येव प्रगृह्यन्ते । तत्र वर्णचित्रेषु चतुर्थ्यञ्जनं यथा,—

जजौजोजाजिजिज्जाजी तं ततोऽतितता तितुत् ।
भाभोऽभीभाभिभूभाभूरारारिरिरीररः ॥ २ ॥

जनौजाविति ॥ ततोऽनन्तरम् । जजौजोजाजिजित्-जजा युद्धनिपुणास्तेषामोजसा बलेन जाता-उत्पन्नायाः-आजिः संग्रामस्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जयतीति तथोक्तः । जयतेरत्राकिवम् । अतिततात-
चतुरङ्गसैन्येन प्राप्तविस्तारान् । अतिनः सततगमनशीलः
तथोक्तः । अत्र तुद-व्यथनेऽस्मात् किवप् । भाभः-भानां शुक्र-
तीत्यादीनाम्-आभेवाभा दीप्तिर्यस्येति-उपमानपूर्वपदबहुव्रीहाव-
रपदलोपे च भाभः । अभीभाभिभूभाभूः अभियो भयशून्यानि भान-
आभिभवतीति-अभीभाभिभूः-अत्र भवतेः किवप् । तादृशी या भा
तेजस्तस्याभूराश्रय इत्यर्थः । अरिश्चञ्चुः-बलभद्र इति यावत् । अरि-
रीरः-अरीणां शत्रुणांरीः सञ्चरणं रीङ् गताविति धात्वनुसारात्
तस्या ईरो धूनने राति ददातीति-अरिरीरः (एतादृशः) जार्जा
योद्धा जज-युद्धेऽस्मादावश्यकेऽर्थेणिनिः । तं वणुदारिणम् आर
जगाम-इत्यर्थः ॥ २ ॥

त्रिव्यञ्जनं यथा-

देवानां नन्दनो देवो नोदनो वेदनिन्दिनाम् ।
दिवं दुदाव नादेन दाने दानवनन्दिनः ॥ ३ ॥

देवानामिति ॥ देवानां सुराणां नन्दनः-आनन्दकारकः । वेद-
निन्दिनां-वेदानाम् ऋग्यजुसामादीनां निन्दिनां निन्दकानां नास्ति-
कानामित्यर्थः । नोदनः प्रतिक्षेपकः । सामान्याभिप्रायेणैकवचनम् ।
देवः-स्वर्गस्थितिप्रत्यवहारक्रीडातत्परः । दानवनन्दिनो दैत्यानन्द-
कस्य हिरण्यकशिपोरित्यर्थः । दाने खण्डने-वक्षस्थलविदारण इति
यावत् । यो नादशब्दस्तेन दिवं सुरलोकं दुदाव-उपतापयामास-
इत्यर्थः । दुदु-उपताप-इत्यस्य लिटिरूपम् ॥ ३ ॥

द्विव्यञ्जनं यथा-

भूरिभिर्भारिभिर्भीरुर्भूभारैरभिरेभिरे ।
भेरीरेभिभिरभ्राभैरभीरुभिरिभैरिभाः ॥ ४ ॥

भूरीति ॥ भूरिभिः प्रचुरैर्भारिभिः प्रकृतिसारभारवाहिभिः
अतिप्रमाण शरीरतया । भूभारैः पृथिव्याः-भारभूतैः । भेरीरेभिभिः
भेरी दुन्दुभिरेभिभिश्शब्दैः । रेभृ-शब्देऽस्मादनुकूलात् । अभ्राभैर्नवी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमेघप्रभाभिः । अमीरुभिः-अभयशीलैः । भीरैः-भियं रान्ति ददतीति भीरास्तैर्भीरैर्भयदैरित्यर्थः । (एनादृशैः) इभैर्गजैः । इभाः प्रतिगजाः । अभिरभिरे-अभियुक्ता इत्यर्थः । रभ×राभस्येऽस्य-लिटि रूपम् ॥

एकव्यञ्जनं यथा-

न नोननुन्नो नुन्नोनो नाऽनो नानानना ननु ।
नुन्नोऽनुन्नो ननुन्नेनो नानेना नुन्ननुन्ननुत् ॥ ५ ॥

नेति ॥ हेनानानना-नानाप्रकाराणि-आननानि मुखानि येषां ते । नानाविधास्या इत्यर्थः । ऊननुन्नः-ऊनेन निकृष्टेन नुन्नोविद्धः-ऊननुन्नोयः स ना न पुरुषोन । तथा नुन्नोनः-नुन्नऊनो येन स नुन्नोनो ना पुरुषोऽना नन्वपुरुषः खलु । ऊनाद्भीतः पलायमानस्तुर्किवक्तव्यमित्यर्थः । किञ्च । ननुन्नेनः-नुन्न इनः स्वामी यस्य सनुन्नेनः सनभवतीति ननुन्नेनः । नञर्थस्य नशब्दस्य "सुप्सुपेति" समासः । स नुन्नो विद्धोऽपि-अनुन्नोऽविद्ध एव । यूयमनुन्नस्वामिकत्वादनुन्ना एवेतिभावः । तथा नुन्ननुन्ननुत्-अतिशयेन नुन्ना नुन्ननुन्नास्तान्नुदतीति नुन्ननुन्ननुत्-अतिपीडितपीडको ना पुरुषोऽनना निर्दोषा न भवति किन्तु सदोष एव । नार्त्ते नातिपरिक्षतमिति निषेधादित्यर्थः । अयन्तु नैतादृश इति न पलायितव्यमितिभावः । श्लोकान्ते तकार दर्शनेन नाशङ्कितं खलुनात्रवर्णस्तु भेदक इत्यभ्यनुज्ञानात् ॥ एकव्यञ्जनं सिद्धम् ॥

क्रमस्थव्यञ्जनं यथा-

कःखगौघाङ्चिच्छौजाझाञ्ज्योटौठीडडण्ढणः ।
तथोदधीन् पफर्बाभीर्मयोरिल्वाशिषांसहः ॥ ६ ॥

कइति ॥ वर्णसमाम्नाये येन क्रमेण कादयोमावसानाः पठितास्तेन क्रमेण व्यञ्जननिवेशः । कः खगौघः-खगानां पक्षिणामोघस्समुहस्तमञ्चतीति खगौघाङ् । अञ्चाञ्चु-गतिपूजनयोरित्यस्मात् क्विनि "ऋत्विग्दधृगित्यादिना संयोगान्तादिलोपेचोक्तरूपसिद्धम् । अचि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छौजाः-चितं ज्ञानं लुनाति धत्ति चिच्छं यदोजस्तन्नास्ति यस्याऽसौ-अचिच्छौजाः । ज्ञान्-ज्ञमन्नीति विग्रहे ज्ञमु+अदनऽस्मात् क्विपि अनुनासिकस्य क्विझलोः "इति दीर्घे" मानोधातोरिति मकारस्य नत्वे ज्ञाम्नाति रू० परबलभक्षकोज्ञ-पण्डित इति यावत् "स्तोश्चुनाश्चुः" इतिनकारस्यञकारः । अटाः-संग्रामाङ्गणपर्यटनशीला भटास्तानाठते षाधत-इति क्विप् । उठगताविति धातुरूपम् । तेषामीर्डीश्वरः । अटौठीद् । अडंढणोऽचपलः; डंढण इति चपलवाचिप्रातिपादकमव्युत्पन्नम् । तथा अभीर्भयरहितः । एवंविशिष्टः । कोनामायमुदधीन् समुद्रान् पफर्ब पूरयामासेति प्रश्नः । उत्तरम्-अरीन् शत्रून् लुनन्ति याऽऽशिषस्तासां सहः क्षमः-मयो दैत्यराज इति ॥ ६ ॥

छन्दोऽक्षरव्यञ्जनं यथा-

सरत्सुराराति भयाय जाग्रतो
जगत्यलं स्तोतृजनस्य जायताम् ।
स्मितं स्मरारेर्गिरिजास्यनीरजे
समेतनेत्रत्रितयस्य भूतये ॥ ७ ॥

सरदिति ॥ सुराणां देवानामरातयश्शत्रवस्तेषां भयाय जाग्रतः निद्रारहितस्येत्यर्थः । समेतनेत्रत्रितयस्य प्राप्तत्रिनेत्रस्य (इत्यभूतस्य) स्मरारेश्शङ्करस्य । गिरिजास्यनीरजे-पार्वतीवदनाम्बुजे । स्मितमीषद्धसनं सरद् गच्छत् । जगति संसारे । स्तोतृजनस्य-भक्तजनस्य भूतये श्रेयसेऽलं पर्य्याप्तं जायताम् ॥ ७ ॥

छन्दोक्षरेति ॥ म्यरस्तजभनगालान्ताश्छन्दो विज्ञाति वेदिभिः । दशैववर्णा निर्णीताश्छन्दोरूपप्रसिद्धये । तन्मात्रव्यञ्जन निबद्धं छन्दोऽक्षरव्यञ्जनमित्युच्यते छन्दशास्त्रचणैः ॥ ७ ॥

षड्जादिस्वरव्यञ्जनं यथा-

सा ममारिधमनीनिधानिनी
सामधामधनिधामसाधिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानिनी सगरिमाऽपपापा
साधिगा समसमागमाऽसमा ॥ ८ ॥

सेति ॥ अरिधमनी-अरीन् शत्रून् धमति तापयतीति धमतेर्युटि "कृत्यल्युटोबहुलमिति सूत्र बहुलवचनादन्यत्रापि धमादेशः । निधानिनी-कमलादिनिधानवती । सामधाम-साम्नः सान्त्वस्य धाम गृहम् । धनिनां श्रीमतां धाम तेजः साधिनी-प्रसाधिका । मानिनी पूजावती । सगरिमा-गरिम्णासह वर्त्तते-इति सगरिमा-गौरवती । अपपापपा-अपपापान् निष्कलुषान् पुण्यवतो मनुष्यान् पाति रक्षति इति अपपापपा । सा-प्रसिद्धविभवा । आपगानदी तत्समः क्षणविसर्पिभंगुरः समागमो यस्याः सा तथोक्ता । असमाऽनुपमा (एतादृशी) सा लक्ष्मीः । मम शुभम्भूयादित्यर्थः । षड्जादीति ॥ सरिगामपधानिश्च वर्णासप्तस्वरादयः । षड्जादिकृतसङ्ज्ञा इष्टागन्धर्ववेदिभिः ॥ तन्मात्रव्यञ्जनमयमित्युच्यते कविभिः ॥ ८ ॥

मुरजाक्षरव्यञ्जनं यथा-

खरगरकालितकण्ठं मथितगदं मकरकेतुमरणकरम् ।
तडिदिति रुरुमुण्डहरं हरमन्तरहं दधे घोरम् ॥ ९ ॥

खरगरेति ॥ खरगरकालितकण्ठम्-खरगरेण तीक्ष्णविषेण कालितः कृष्णः कण्ठोयस्य तम् । मथितगदम्-मथितो विलोडितो गदोरोगोयेन तम् । मकरकेतुमरणकरम्—मकरकेतोः कामदेवस्य मरणकरं विनाशकरम् । तडिदितिरुरुमुण्डहरम्-तडिदितिशब्दं विधाय रुरुमुण्डनाम मखध्वंसकारिराक्षसविध्वंसकरमित्यर्थः । घोरम्-भयंकरम् (एतादृशं) हरं शिवम् । अन्तः-अन्तःकरणे हृदये-इति यावत् । अहं दधे ॥ ९ ॥

मुरजेति ॥ पाठाक्षराणि मुरजे लहकारौ तथदधाच्छमौरेफः । नणकर्णगघङाश्चेत्थं षोडशभरतादिकथितानि ॥ तन्मात्रविरचितं मुरजाक्षरव्यञ्जनम् ॥ ९ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुःस्थानाचित्रेषु निष्कस्यं यथा-

भूरिभूतिं पृथुप्रीतिमुरुमूर्त्तिं पुरुस्थितिम् ।
विरिञ्चिं सूचिरुचिधीः शुचिभिर्नुतिभिर्धिनु ॥ १० ॥

भूरीति ॥ हे सूचिरुचिधीः—हे सूचिवत्स्वच्छधीः । भूरिभूतिं प्रचुरैश्वर्य्यं पृथुप्रीतिं विशालप्रीतिम् उरुमूर्त्तिं वरमूर्त्तिं । पुरुस्थितिं-विशालस्थितिं (एतादृशं) विरिञ्चिं ब्रह्माणं शुचिभिः शुद्धाभिर्नुतिभिः स्तुतिभिर्धिनु प्रीणयेत्यर्थः ॥१०॥

वर्णवत्स्थानेष्वपिचतुरादिनियमेन चित्रम् । यद्यप्यत्रअष्टौ-स्थानानि वर्णानामुरः कण्ठशिरस्तथा । जिह्वामूलञ्चदन्ताश्च नासिकाऽष्टौ च तालुचेति ॥ तथापि जिह्वामूलीयस्य स्वरत्वादुरस्य नासिकायाः काव्यप्रवेशाभावादुरोनासिका जिह्वामूलपर्य्युदासेन स्थानपञ्चके चतुरादिनिरूपणम् ॥१०॥

निस्तालव्यं यथा-

स्फुरत्कुराडलरत्नौघ मघवद्धनुकर्बुरः ।
मेघनादोऽथ सङ्ग्रामे प्रावृट्कालवदाबभौ ॥ ११ ॥

स्फुरदिति ॥ अथानन्तरम् । स्फुरत्कुराडलरत्नौघमघवद्धनुकर्बुरः—देदीप्यमानकुराडलरत्नौघ एव मघवतो वासवस्य धनुस्तेन कर्बुरो मेघनाद नामा राक्षसः । संग्रामे जन्ये प्रावृट्कालवदर्थान् मेघकालीनजलद इव-आबभौ-आभातिस्म । इत्युयशाः तालव्याः ॥ ११ ॥

निर्दन्त्यं यथा-

पाप्मापहारी रणकर्म्मशौण्डश्चण्डीश-
मिश्रो मम चक्रपाणिः ।
भूयाच्छ्रियापश्रमयेद्भयमाणो मोक्षाय
मुख्यामरपूगपूज्यः ॥१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाप्येति ॥ पाप्मापहारी-अघहरणशीलः । रणकर्मशौण्डः-लङ्ग्रामकर्म्मणिचतुरः । चण्डाशमिश्रः-महादेवनयुक्तः । अपश्रमया श्रमरहितया । श्रिया लक्ष्म्या-ईक्ष्यमाण अवलोक्यमाणः । मुख्यामरपूगपूज्यः-श्रेष्ठदेवगणपूजितुंयोग्यः । (एवं विशिष्टः) चक्रपाणिः-चक्रं पाणौ यस्य सः-विष्णुः । मम मोक्षाय मुक्तये भूयात् ॥ तुलसादन्त्याः ॥ १२ ॥

निरौष्ठ्यं यथा-

नयनानन्दजनने नक्षत्रगणशालिनि ।
अघने गगने दृष्टिरङ्गने दीयतां सकृत् ॥ १३ ॥

नयनेति-शरत्कालगगनशोभावर्णनम् । नयनानन्दजनने-नेत्रानन्दजनके नक्षत्रगणशालिनि-तारासमूहैः शोभमाने । अघने-स्वच्छे (एवंविशिष्ट) गगने-आकाशे । हे अङ्गने । हे सुन्दरि । दृष्टिदृक् सकृदेकवारं दीयताम् इति । उपूपध्मानीया औष्ठ्याः ॥ १३ ॥

निर्मूर्द्धन्यं यथा-

शलभा इव धावन्तः सायकास्तस्य भूभुजः ।
निपेतुः सायकच्छिन्ना स्तेन संयुगसीमनि ॥ १४ ॥

शलभा इति ॥ तेन कपिलेन राज्ञा तस्य कोशलाधिपस्य प्रसेनजितः । तदग्रेरुपष्टार्थ ॥ कटुरुषा मूर्द्धन्याः ॥ १४ ॥

त्रिस्थानचित्रेषु निरौष्ठ्यदन्त्यं यथा-

जीयाज्जगज्ज्येष्ठगरिष्ठचारश्च-
क्रार्चिषा कृष्णकडारकायः ।
हरिर्हिरण्याक्षशरीरहारी खगेशगः
श्रीश्रयणीयशय्यः ॥१५॥

जीयादिति ॥ जगज्ज्येष्ठगरिष्ठचारः-जगति संसारे ज्येष्ठः-श्रेष्ठः-गरिष्ठोगुरुश्चारोगति र्यस्य सः । चक्रार्चिषाकृष्णकडारकायः-चक्रस्य तेजसा कृष्णः कडारः कर्कशः कायः शरीरो यस्य सः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खगेशगः-खगानामीशो गरुड स्तेनसह गच्छतीति खगेशगः-गरुड-गा इत्यर्थः । श्रीश्रयणीयशय्यः-श्रियो लक्ष्म्याः श्रयणीया सा शय्या यस्य सः । हिरण्याक्षशरीरहारी हिरण्याक्षस्य हिरण्यकशिपोः शरीरं विग्रहं हरति तच्छील, इति तथोक्तः । इत्थम्भूतः । हरिर्नृसिंहः । मम जीयात्सर्वोत्कर्षेण प्रवर्त्तत्तामित्यर्थः ॥ १५ ॥

निरौष्ठ्यदन्त्यमिति ॥ अनेनैव द्विकान्तरपरिहारेण लोष्टप्रस्तावो गवेषणीयः ॥

निरौष्ठ्यमूर्द्धन्यं यथा-

अलिनीलालकलतं कं न हन्ति घनस्तनि ।
आननं नलिनच्छायनयनं शशिकान्ति ते ॥ १६ ॥

अलिनीति ॥ हे घनस्तनि ! सान्द्रस्तनि ते तव-आननं मुखं कं नवयुवकपुरुषं न हन्ति नोपतापयतीत्यर्थः । अन्यत्सर्वमाननविशेषणम् । तथाहि-अलिनीलालकलतम्-भ्रमरवन्नीलकवरीलतम् । नलिनच्छायनयनम्-कमलकान्तिसदृशनेत्रम् । शशिकान्तिचन्द्रवत्कान्तिरित्यर्थः ॥

द्विस्थानचित्रेषु दन्त्यकसाम्यै यथा-

अनङ्गलङ्घनालग्ननानातङ्का सदङ्गना ।
सदानघ! सदानन्द! नताङ्गीसङ्गसङ्गत ! ॥ १७ ॥

अनङ्गेति ॥ हे सदानघ ! हे अनघ ! दोष रहितेत्यर्थः । हे सदानन्द ! सदैव प्रियालाभेनानन्दयुक्त ! हे नताङ्गीसङ्गसङ्गत ! नताङ्ग्याः कस्याश्चिदन्यस्याः सङ्गे सङ्गत ! (तव) सदङ्गना-शोभनाङ्गना (कीदृशी) अनङ्गलंघनालग्ननानातङ्का-कामाक्रमणया नानारूपतया वर्त्तते । अतस्तामनुकम्पस्वेति सोपालम्भप्रार्थनावाक्यार्थः ॥ १७ ॥

एकस्थानचित्रेषु कण्ठ्यै यथा-

अगा गां गाङ्गकाकार्कं गाहकाघककाकहा ।
अहाहाङ्ग खगाङ्गागकङ्कागखगकाककक ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अगा-इति ॥ गङ्गायाः-इदं गाङ्गकम् गङ्गासम्बन्धिजलमित्यर्थः। तस्य-अकः कुटिला गतिः । अक कुटिलायां गतावित्यनुसारात् । तस्यां ककरूप तन्मध्यस्थ गाहको विलोलक्रः कुत्सितमधं पापमघकर्म-स एव काकस्तं हतवानघकाकहा । अन्यैतु विसगर्न्तं पठन्ति तत्र जहातिर्विचिरूपम् । एवं विधस्त्वङ् गां स्वर्गम् अगाः-अयासीः-अत्रेण धातोराशसायां लुङ् (कीदृशस्सन्) हानं हाः न हा अहास्तां जिहीत प्राप्नोतीति-अहाहस्तादृशमङ्गं यस्येति स खगो गरुत्मूर्य्योवासोऽङ्कश्छिह्नभूतो यस्य तादृशोगोऽर्थान्मरुस्तद्वर्त्तिनः कङ्काख्या अगखगा वृक्षनिवासिनः पक्षिणस्तेऽपि आकाकका गगनस्पृहयालवो यस्य स तथाऽऽस्तान्तावदन्ये पतत्रिभिः (अपि) अभिनन्दितगमन इत्यर्थः ॥ १८ ॥

स्वरचित्रेषु ह्रस्वैकस्वरं यथा-

उरुगुं हुगुरुं युत्सु चुक्रुशुस्तुष्टुवुः पुरु ।
लुलुभुः पुपुषुर्मुत्सु मुमुहुर्मुहु मुहुः ॥१९॥

उरुगुमिति ॥ उरुगुं विशदवाचं हुगुरुं स्वर्गस्थदेवानामाचार्य्यं बृहस्पतिमित्यर्थः । युत्सु-युद्धार्थं "निमित्तात्कर्म्म योगे" इति सप्तमी बोध्या । चुक्रुशुः-आर्त्ताश्शरणं ययाचिरे देव भटा इति शेषः (अत एव) पुरु बहुधा तुष्टुवुः-स्तुवन्ति स्म । युद्ध प्रयोजनमाह-मुत्सु-आनन्देषु लुलुभुः लुब्धवन्तः पुपुषुः पुष्टावभूवुः । मुह वितर्के मुहुर्वारम्बारं किम् मुमुहुर्मोहमासादितवन्तः । यतः क्षोभनादीनामव्यवस्थेति भावः ॥ १९ ॥

दीर्घैकस्वरं यथा-

वैधैरेनैरशैरेन्द्रैरजैरलैजैनैः सैद्धैः ।
मैत्रैनैकैर्धैर्य्यैर्वैरदैस्वैःस्वैरदैवैस्तैस्तैः ॥ २० ॥

वैधैरिति ॥ विधिर्विरिञ्चिः । ईलक्ष्मी स्तस्याः-इनः प्रभुर्विष्णुरीशो महादेव इन्द्रो बिडौजाः-ईजः कामो लक्ष्मीपुत्रत्वात् । इला पृथ्वी जिनो बुद्धः सिद्धाः देवविशेषाः मित्रः सूर्य्यो रैदो धनदः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुबेरो देवा उक्तव्यतिरिक्ता मरुदादयः । एषां सम्बन्धिभिर्धैर्य्यैर्धृतिभिः स्वैर्वित्तैश्च नकरनेकविधै स्तैस्तैः प्रसिद्धरूपैरहं स्वैरैः सुष्ठु-आसमन्तात्समृद्धाभवानीति-आशंसा वै वाक्यालङ्कारे ॥२०॥

ह्रस्वद्विस्वरं यथा-

क्षितिस्थितिमितिक्षितिविधिविन्निधिसिद्धिलिट् ।
मम त्र्यक्ष नमदक्ष हर स्मरहर स्मर ॥२१॥

क्षितीति ॥ क्षितिः पृथ्वी तस्याः स्थितिः पालनं मितिमानं क्षितिर्नाशस्तद्विधिम्प्रकारं वेत्ति-इति क्षितिस्थितिमितिक्षितिविधिवित् । निधानं निधिर्निखिलैश्वर्य्यमित्यर्थः । सिद्धिः-अग्रसिद्धः-निधासिद्धौ लेढीति क्विप् निधिसिद्धिलिट् । नमन् भग्नते जाः-दक्षो यस्मात् स तत्सम्बुद्धौ । स्मरहर मदनदहन । त्र्यक्ष-त्रीणि-अक्षीणि यस्य स तत्सम्बुद्धौ । हर महादेव मम मां स्मर हृदि चिन्तयेत्यर्थः । अत्र "अधीगर्थदयेशां कर्म्मणीति" कर्म्मणि षष्ठ्यवधेया ॥ श्लोके सर्व्वे सम्बोधनान्तपदम् ॥

दीर्घद्विस्वरं यथा-

श्रीदीप्तीह्रीकीर्त्तीधीनीतीगीः प्रीती ।
एधतेद्वेद्वेयेतेनेमेदेवेशे ॥२२॥

श्रीति ॥ श्रीश्च दीप्तीश्च श्रीदीप्ती लक्ष्मीतेजसी । ह्रीश्चकीर्त्तिश्च ह्रीकीर्त्ती लज्जायशसी । धीश्च नीतीश्च धीनीती बुद्धिनयौ । गीश्च-प्रीतीश्च गीःप्रीती वाक्प्रमोदौ । ये-इमे द्वे द्वे पूर्वोक्ते ते तव एधते वर्द्धते देवेश-इन्द्रेऽपि नस्तः ॥ इत्यर्थः ॥

त्रिस्वरेषु ह्रस्वस्वरं यथा-

क्षितिविजितिस्थितिविहितिव्रतरतयः परगतयः ।
उरु रुरुधुर्गुरु दुधुवुः स्वमरिकुलं युधि कुरवः ॥२३॥

क्षितीति ॥ क्षितेः पृथिव्या विंजिति विंजयः स्थिते वर्णाश्रमव्यवस्थादालक्षणाया विहिति विंधानं तदेव व्रतं तत्र रतिर्येषां ते तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परगतयः परा श्रेष्ठा गतिः प्रमिति र्येषान्ते तथा-एवंविधाः कुखो यादवः स्वमरिकुलं निजशत्रुवंशम् । उरु विस्तीर्णं रुरुधुः रुन्धान्त स्म तदेव गुरु महत्-दुधुवुः कम्पयामासुः ॥२३॥

चतुस्स्वरेषु दीर्घस्वरं यथा-

आम्नायानामाहान्त्या वाग्गीती।रीतीः प्रीतीर्भीतीः ।
भोगो रोगो मोदो मोहोध्येये चेच्छेत् क्षेमे देशे ॥२४॥

आम्नायेति ॥ आम्नायानां श्रुतीनामन्त्यावाग् गीः-उपनिषदिति यावत् + सा हिताहितप्रतिपादनपरा किमाह-या गीतयस्ता ईतय उपसर्गायाः प्रीतयस्ता भीतयो भयानि यो भोगः स्मरोगो यो मोदो हर्षः स मोहोन परमेवमाह (किन्तु) यावदध्येये ध्यातव्ये क्षेमे क्लेशरहिते देशे विषये मोक्षलक्षणे-इच्छेत्-इच्छां कुर्यादित्यर्थः ॥ देशेऽत्राधारोऽधिकरणमिति-अधिकरणसज्ञायाम् । सप्तम्यधिकरणेचेति सप्तमी बोध्या मोक्षे-इच्छा स्तीतिवत् ॥ २४ ॥

प्रतिव्यञ्जनविन्यस्तस्वरं यथा-

तापेनोग्रोऽस्तु देहे नो हेये विल्लोभिनिन्दिना ।
जायाग्रे हि गुणिप्रष्ठा हितोऽक्षेपोऽमृतोक्षिणि ॥२५॥

तापेनेति ॥ हेये हातव्ये वस्तुनि या विद्-लाभो । विद्लृ लाभे-इत्यनुकूलात् । तत्र ये लोभिनो लोभवन्तस्तन्निन्दनशीलन तापेन तेजसा-अर्थादुग्रश्चण्डरश्मिः-स मम देहेऽस्तु तेजस्वी भवानीति यावत् । किमिति-एवमाशास्यते-इत्यत आह-अमृतोक्षिणि-अमृतस्यन्दिनि जायाग्रे कान्ताग्रे गुणिनां गुणवतां प्रेष्ठा प्रियतमाअक्षेपोऽविलम्ब एव हितोऽर्थतः समरस्य-इति दत्वाशिषं कोऽपि कस्मै कार्मुककर्मणे जगाम समरंकर्तुमरिलक्ष्मीस्वयंवरम् ॥ २५ ॥

तदेवापास्तसमस्तस्वरं यथा-

तपनग्रस्तदहन हयवल्लभनन्दन ।
जय ग्रहगणप्रष्ठ हतक्षप मतक्षण ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तपनेति ॥ हे तपन ! हे सूर्य्य ! जय सर्व्वोत्कर्षेण प्रवर्त्तस्व । शेषं निखिलंपदं सम्बोधन विशेषणम् । अस्तदहन-अभिभूतपावक । हयवल्लभनन्दन-हयवल्लभोरेवन्तः स तनयो यस्य तत्सम्बुद्धौ । अहगणप्रष्ठ-निखिलग्रहगणप्रिय । हतक्षप-अपहतरात्रे । मतक्षण-सम्बतात्सव ॥ २६ ॥

आकारचित्रेष्वष्टदलं यथा-

या श्रिता पावनतया यातनच्छिदनीचया ।
याचनीया धिया मायायामायासंस्तुता श्रिया ॥ २७ ॥

अस्यन्यासमाह-

कर्णिकायां न्यसेदेकं द्वेद्वे दिक्षु विदिक्षु च ।
प्रवेशनिर्गमौ दिक्षु कुर्य्यादष्टदलाम्बुजे ॥

येति ॥ या-देवी पावनतया-पवित्रत्वेन-आश्रिता-आधार रूपा (पुनः) अनीचया धिया विशिष्टबुद्धया । मायायामायासं-मायाया अविद्यायाः-आयामस्य विस्तारस्य-आयासं ग्लानिं विच्छेदं याचनीया प्रार्थनीया (यतः) यातनच्छित् यातनं नरकानुभवनीयं दुःखं च्छिनत्तीति (पुनः) श्रिया-लक्ष्म्यापि स्तुता पणितेत्यर्थः ॥ अस्यन्यासमाह-कर्णिकायामिति-आद्यो यावर्णः कर्णिकायां श्रितेति पावेति क्रमेण द्विकं द्विकमष्टपत्रेषु याश्रिता श्रियेत्यादौ दिग्दलेषु प्रवेशनिर्गमौ ॥ २७ ॥

द्वितीयमष्टदलं यथा-

चर स्फार क्षार क्षारकार गरज्वर ।
चलस्फाल वलच्चालबल कालगल ज्वल ॥ २८ ॥

अस्यन्यासमाह-

अष्टधाकर्णिकावर्णः पत्रेष्वष्टौ तथापरे ।
तेषां सन्धिषु चार्यष्टावष्टपत्र सरोरुहे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चरति ॥ हे हर ! ज्वल दीप्यमानो भव-अत्राऽऽक्षिप्तसम्बोधनपदस्यैवसर्वं विशेषणं बोध्यम् । चरः सञ्चरणशीलः स्फारोयो वरस्तंक्षरति ददाति-इति चरस्फारवरक्षारस्तत्सम्बुद्धौ । वरकार-वरान् श्रेष्ठान् किरति क्षिपति करोति हिनास्त वेति कर्मरायण् । गरज्वर-गरः कालकूटस्तस्य ज्वरोज्वरणात् (तारडवारम्भे) चलस्फाल-चलाश्चलायमानाः स्फाला खिशूला यस्य । वलक्षालव-लव लक्षः-धवलः अलबलं व्याप्तबलं यस्य । कालगल नीलकण्ठ ॥ न्यासमाह-अष्टधेति-अत्रप्रथमार्द्धे एक एवरेफोऽष्टधाकर्णिकायाम-परार्द्धस्यान्येऽष्टौ लकारवर्ज्यं दलेषु तेषां सन्धिषु-अन्येऽष्टाल-कारः ॥ २८ ॥

तृतीयमष्टपत्रं यथा-

न शशीश नवे भावे नमत्काम नतव्रत ।
नमामि माननमन ननु त्वा नु नयं यम् ॥२९॥

अस्यन्यासमाह-

प्राक्कर्णिकां पुनः पर्ण पर्णाग्रं पर्णकर्णिके ।
प्रतिपत्रं व्रजेद्धीमान् इह त्वष्टदलाम्बुजे ॥

॥ एवं चतुष्पत्रषोडशपत्रेऽपि द्रष्टव्ये ॥

नशशीशेति ॥ शशीश चन्द्रे नवे नवीने भावे भक्तौ स्थित इतिशेषः । त्वामहन्ननमामि (किन्तु) नमाम्येवेति काकुः । नमत्काम-नमन् भग्नः कामो यस्मात् । नतव्रत-नतमुपनतं व्रतं यस्य । माननमन शत्रूणामुन्नतिनाशनं नन्विति पूजासम्बोधनं । त्वा इति त्वाम्-अनुनयन् विनयं कुर्वाणोऽयं पुरुष इतिशेषः । न्यासमाह-प्राक्कर्णिकामिति-पूर्वं कर्णिकायामाद्योनकारोग्राह्यस्ततश्शेति पर्ण-मध्ये शीति पर्णाग्रे परावृत्य पर्णकर्णिकयोश्शकारनकारौ पुनः कर्णिकातो दलाग्रगमागमेऽपि । अयमेवक्रमश्चतुर्दलपद्मे ॥२९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तयोश्चतुष्पत्रं यथा-

सासवा त्वा सुमनसा सा नतापीवरोरसा ।
सारधामेति सहसा साहसर्द्धं सुवाससा ॥३०॥

अस्यन्यासमाह-

कर्णिकातो नयेदूर्ध्वं पत्राकाराक्षरावलीम् ।
प्रवेशयेत्कर्णिकायां पद्ममेतच्चतुर्दलम् ॥

सासवेति ॥ सासवा-आसवेन सह वर्त्तमाना सासवा-अ. वादितमदिरेत्यर्थः । पीवरेण स्थूलेन उरसा जघनेन नता नम्रा । सारधामा-सारंधाम यस्याः सा । उत्कृष्टकान्तिरित्यर्थः । सहसा सहास्या अकस्माद्वा शृङ्गारोद्दीपनस्वभावेन मार्गशीर्षेण हेतुना शोभनेन च लक्षिता हे साहसर्द्धं-सर्व्वनिशीथाभिसरणसाहसराशिक त्वामेति उपगच्छतीत्यर्थः ॥ ३० ॥

षोडशपत्रं यथा-

नमस्ते महिमप्रेम नमस्यामतिमदम ।
क्षामसोम नमत्काम धामभीम समक्षम ॥३१॥

न्यासमाह-

गोमूत्रिका क्रमेणस्युर्वर्गाससर्वे समास्समाः ।
मध्ये मवर्णविन्यासात्पद्मोऽयं षोडशच्छदः ॥

नमस्त इति ॥ महिमनि महत्वे प्रेमा यस्य तं नमस्य नमस्कृत्य अमतिमतो दाम्यतीति-अमतिमदम । क्षामः कलामात्रेण चूडासङ्गतः सोमो यस्य । नमन् भग्नः कामो यस्मात् । धाम्न तेजसा भीमभयानक सामा सकलव्युत्थानहेतु साधारणी क्षम यस्य अस्यैतानि सम्बोधनविशेषणानि ते तुभ्यन्नमस्कुरुते कश्चि दिति ॥ न्यासमाह-गोमूत्रिकेति । वर्णा मकारव्यतिरिक्ताः समा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मकारसहिताः समाः समा इति वीप्सा प्रतिवर्णं मकारसाहित्य बोधनार्थाः ॥३१॥

अष्टपत्रमेव कविनामाङ्कं यथा–

रातावद्याधिराज्या बिसररसविद व्याजवाक्क्षमापकरा।
राका पक्षाभिशेषानयननयनस्वा खया स्तव्यमारा ॥
रामा व्यस्तस्थिरत्वा तुहिननहितुः श्रीः करक्षारधारा ।
राधारक्षास्तु मह्यं शिवमसमवशिव्यालविद्यावतारा ॥३२॥

अस्पन्यासमाह–

निविष्टाष्टदलन्यासमिदं पादार्द्धभक्तिभिः ।
अस्पृष्टकर्णिकं कोणैः कविनामाङ्कमम्बुजम् ॥
तत्राङ्को राजशेखरकमलः ।
एतेन चक्रमपि व्याख्यातम् ॥

रातावेति ॥ गीर्वाणचमूभटः कश्चित् युयुत्सुर्दैत्यसेनया। तत्काल-कृतसान्निध्यां मायादेवीमपूजयत् । तथाहि । व्याजो माया सैव वाग्रूपाव्याजशब्दोपपदं वागभिधानं यस्याः सा मह्यं रक्षास्त्विति सबन्धः । रातं दत्तमवद्यं दोषबहुलमाधिराज्यमवद्या आधयो यत्र तादृशं वा राज्यं यया विशिष्ट स्मरणं विसरस्तं राति प्रयच्छति यो रसोऽर्थाद्विरस्तं वेत्ति विन्दति वा या क्ष्मायां पृथिव्यामपकारः पुत्रकलत्रादिरूपो यस्याः सकाशादिति गमकत्वाद्बहुव्रीहिः समासः। राका पूर्णिमा द्वादशवर्षदेशीयकन्यारूपा वा। पद्माभः शरीरसंलग्न शेषः सर्पो यस्याः–नयनन्नीति स्तान्नयतीति यं नयनं दृष्टिर्ज्ञानमिति यावत् । तदेव स्वमात्मा यस्याः खे व्योम्नि यातीति खया स्तव्यो मारो भारणं कामो वा यस्याः सा रामा रमणीया स्त्रीरूपा वा व्यस्तं विनाशितं स्थिरत्वं यया तुहिनं नयति प्रापयतीति नयतेर्डप्रत्यये तुहि-ननश्चन्द्रस्तस्य नहितुर्जटाजूटे बन्धयितुः परमेश्वरस्य श्रीः शक्ति-रूपा नहि–अतिबन्धातीति नहेर्वीचि नहं स्तुतिमासाद्नयतीति (सर्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रातिपदिकेभ्यक्विबूबा वक्तव्य इति क्विपि तृजन्तस्यरूपम् । क
सुखं राति प्रयच्छतीति करस्तस्य क्षारभूता दस्यवस्तेषां खड्गा-
दिधारेव धाराच्छेत्री राधेति देव्याः पौराणिकं नाम ममेति-अव्ययं
भावप्रधानं शिवे मम त्वं मान्ति परिच्छिन्दन्ति ये वशिनो योगिन-
स्तेषामपि व्यालविद्या क्षुद्रविद्यामवतारयतीति या सा तथा ॥
न्यासमाह ॥ निविष्टेति-अष्टभिः पादाद्यैरष्टदलविरचना । यद्वर्णाष्टकं
नाम्ना उत्तिष्ठति तदाह । राजशेखरकमल कविकाव्यनामलाभात् ॥
अविभक्तिकत्वमपि-अदोषः । एतेनेति-नामाङ्कपद्मकथनेन चक्रमपि
नामाङ्कमवसेयम् ॥ ३२ ॥

षड्रचक्रं-यथा-

सत्त्वं मानविशिष्टमाजिरभसादालम्ब्य भव्यः पुरो
लब्धाघक्षयशुद्धिरुद्धुरतरश्रीवत्सभूमिर्मुदा ।
मुक्त्वा काममपास्तभीः परमृगव्याधः स नादं हरे-
रेकौघैः समकालमभ्रमुदयी रोपैस्तदा तस्तरे ॥३३॥

अस्यन्यासमाह-

पुरः पुरो लिखेत्पादानत्र त्रीन् षड्रीकृतान् ।
तुर्य्यन्तु भ्रमयेन्नेमौ नामांकश्चक्रसंविधिः ॥

सत्त्वमिति ॥ भव्यः कल्याणमूर्त्तिः । लब्धाऽघक्षयः शुद्धिश्च
येन स लब्धाघक्षयशुद्धिः । श्रीवत्सस्य लाञ्छनविशेषस्य भूमिर्वक्ष
सा-उद्धरतरा-उन्नततरा यस्य स उद्धरतरश्रीवत्सभूमिः । काम-
पास्तभी र्निर्भीकः । परमृगव्याधः+परे शत्रवस्ते-एव मृगास्तेषां
व्याधः । उदयी-नित्याभ्युदयवान् सः हरिः । पुरः-पूर्व्वम् । आजिर-
भसात्-रणरागात् । मानविशिष्टं मानेन-अहंकारेण विशिष्टं युक्तं
सत्त्वं बलम् आलम्ब्यास्थाय मुदा-उत्साहेन हरेः सिंहस्य नादमुक्त्वा
सिंहनादंकृत्वा-इत्यर्थः समकालमेककालम् । एक ओघो येषां तैरेकप्र-
हारैः । रोपै रिषुभिरभ्रमाकाशं तदा तस्मिन्काले-आतस्तरे-आच्छा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दयामासेत्यर्थः ॥ न्यासमाह-पुरः-इति पुरः पुरो लिखित्वाऽन्यानन्ये लिखेद्यथा षडराः सम्पद्यन्ते ॥ ३३ ॥

अत्राङ्के माघकाव्यमिदं शिशुपालवधः

एवं चतुरङ्कमपि यथा-

शुद्धं बद्धसुरास्थिसारविषमत्वंभुग्नजयातिस्थिर ।
अष्टोधर्मरजः पदं गवि गवां क्षीणेन चञ्चद्भ्रुवा ॥
तथ्यं चिन्तितगुप्तिरस्तविधिदिग्भेदं नचक्रं शुचा ।
चारोः प्रांशुरदभ्रमुप्रतनु मे स्थ्यो भवानीरुचा ॥
अत्राङ्कश्शुभ्रतरवाचा बद्धाचेतिचक्रं राजगुरुणेदं सादरमवादि ॥ ३४ ॥

शुद्धमित्यादि ॥ मे मम गवि वाचि शुद्धमकलुषं धर्मादुत्क्रान्तमुद्धर्ममादृशं यद्रजो राजसभाव स्तस्य पदं स्थानं तद्भ्रष्टं विनष्टं यस्मादस्ताविधिर्दिक्-दैवपारतन्त्र्यं यत्र तथाविधं शुचा शोकेन च न-चक्रीकृतमनपहृतम् अदभ्रमुपचितं यद्भद्रं कल्याणं तत्तनु विस्तारयेति प्रार्थना । बद्धैरलङ्कारीकृतैः सुराणां ब्रह्मादिदेवानां सारं शिरस्तदस्थिभिर्बद्धमुण्डमालाभिर्भयानक । रुजां रोगाणां जयेनातिस्थिर । अक्षीणेन उपचितेन चञ्चद्भ्रुवा सालङ्कादेन गवा वृषेण-उपलक्षितः । तथ्यमिति क्रियाविशेषणम् । चिन्तिता गुप्तिर्भूतानां रक्षा येन । चारो रमणीयः । उग्रो महादेवस्त्वमप्रांशुः । सर्वस्मादुच्चैः पदे स्थितो भवानीरुचा वामार्द्धस्थित-पार्वतीकान्त्या रम्यस्तन्वितिसम्बन्धः । अत्र पूर्ववदेवन्यासः । अङ्कास्तु चत्वार इति विशेषः ॥ ३४ ॥

गतिचित्रेषु गतप्रत्यागतं यथा-

वारणागगभीरा सा सारभीगगणारवा ।
कारितारिवधा सेना नासेधावरितारिका ॥
अत्रायुक्पादयोर्गतिर्युक्पादयोः प्रत्यागतिः ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वारणेत्यादि- ॥ वारणा गजा एव अगाः पर्वता स्ते गभीरा दुरवगाहा सारा श्रेष्ठा भियं भयं येन यान्ति तादृशानां गणानामारवो यत्र । कारितः कृतोऽरीणां शत्रुणां बधो यया । अत्र करोतेः स्वार्थे णिजू बोध्यः । आसेधः परैः प्रतिषेधस्तेन हीना । वारितास्सुभटैर्युद्धार्थमाहूता अरयो यस्यां सा तथा । वर ईप्सायामस्मात् क्तप्रत्यये वरितेति निष्यन्नम् । अत्रश्लोकेऽयुक्पादयोः प्रथमतृतीययोः आनुलोम्येन वर्णावली गृहीत्वा तत्प्रतिलोमरूपौ युक्पादौ द्वितीयचतुर्थौ गृह्यते । पठितेवर्णाद्वर्णान्तर सञ्चारोगति स्तन्नियमनेन चित्रं गतिचित्रं स चात्र यथोक्त रूप एव ॥ ३५ ॥

तदुत्तरगतं यथा-

निशितासिरतोऽभीको न्येजतेऽमरणा रुचा ।
चारुणा रमते जन्ये कोभीतो रसिताशिनि ॥
अत्र गतप्रत्यागताभ्यां स एव श्लोकः ॥३६॥

निशितेति- ॥ हे अमरणा मरणरहिताः-देवा इत्यर्थः । निशितासिरतोऽतितीक्ष्णखड्गरतः । अभीको भयशून्यश्च रुचा दीप्त्या न्येजते न कम्पते कोभीतोजनः रसिताशिनिशब्दायमानाशनशीलरक्षः पिशाचादि व्याप्ते जन्ये सङ्ख्ये चारुणा सुन्दरेण रमते न कथञ्चिदित्यर्थः । अत्र सन्दर्भ समाप्तिपर्य्यन्तं या वर्णमाला गृहीता सैव समाप्तेः-आरभ्य प्रत्यागत्वा याव-दारम्भं समाप्येते-इति पूर्व्वमर्द्धेनैवमिति ॥ ३६ ॥

श्लोकान्तरं यथा-

वाहनाऽजनि मानासे साराजावनमागतः ।
मत्तसारगराजेभे भारीहावज्जनध्वनि ॥

अत्र प्रातिलोम्येनापरः श्लोको भवति यथा-

निध्वनज्जवहारीभा भेजे रागरसात्तमः ।
ततमानवजारासा सेना मानिजनाहवा ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाहनेति ॥ तत अनन्तरम् । वाहना-अनीका-अनमा प्रणति-शून्यासती-अजनि जाता । साराजौ महत्सङ्ग्रामे मानासे शत्रुमानक्षेपके मत्तसारगराजेभ-मत्ताः-मदेनोन्मदाः सारगाः सोत्कर्षगति-शालिनो राजेभा राजहस्तिनो यस्मिन् तस्मिन् तथोक्ते । भारीहावज्रनध्वनि-भारिणः स्वामिनार्पितसमरभाराः । अतएव यथोचितचेष्टावन्त स्तेषां जनानां ध्वनिः सिंहनादो यस्मिन्निति क्रियाविशेषणमित्यनुलोमश्लोकार्थः ॥ ३७ ॥

अपरश्लोकार्थो यथा-

निध्वनेति ॥ निध्वनज्जवहारीभा-निध्वनन्तः स्वनन्तो जनेषु वेगेन हारिण इभा गजा यत्र । ततमानवजारासा ततो विस्तीर्णो मानवजारासः सैनिककृत आरावः कोलाहला यत्र । मानिजनानामहङ्कारिणां वीराणामाहवो द्वन्द्वयुद्धं यत्र । ईदृशी सेना । रागरसात्परलक्ष्मीहरणरसेन तमो भेजे क्रोधमवापेति ॥ ३७ ॥

भाषान्तरगतं यथा-

इह रे बहला लासे बाला राहुमलीमसा ।
सालका रसलीला सा तुङ्गालालि कलारत ॥
अत्र प्रातिलोम्येनापरः प्राकृतश्लोको भव० ॥३८॥

यथा-

तरला कलिला गातुं सालाली सरकालसा ।
सामली बहुरालावा सेलीला हव रेहइ ॥

इहर इति ॥ लासे नृत्ये बहला असंकुचिता राहुमलीमसा श्यामा सालका भ्रूकर्णादिपरभागार्पकचूर्णकुन्तलवती रसलीला रसाच्छृङ्गारालीला क्रीडा यस्याः सा तथा तुङ्गा-उच्चव्यवहारा एवंविधा सा बाला कलारत हेचतुःषष्ठिकलारत-अलालिलालिता त्वयेतिशेषः । इति संस्कृत श्लोकार्थः ॥३८॥

अपर प्राकृतश्लोकार्थो यथा—

तरलेति ॥ कला गीतवाद्यनृत्यानां सङ्करसहिता करणपटी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यसी गातुं तरला त्वरिता सालाली नानावृक्षपंक्तिस्तदीयेन सरकेण मधुना अलसा श्यामा मधुरालापा सेलो उत्तमानारी सह इरया मदिरया वर्त्तते सेला । अला भूषयित्री । हव धवेति सम्बोधनम् । रे इहे राजते प्राकृतश्लोकार्थः । एवं भाषान्तराणामपिगतप्रत्यागती बोद्धव्ये ॥ १ सेलास्यादुत्तमा नारीति कोशे ॥

तदर्थानुगतं यथा—

विदिते दिविकेऽनीके तं यान्तं निजिताजिनि ।
विगदं गवि रोद्धारो योद्धा यो नतिमेति न ॥
अत्र प्रातिलोम्येन स एव पदार्थः ॥३९॥

विदित इति ॥ दिवि स्वर्गे विदिते प्रसिद्धे निजिताजिनि निजिताः परेषां शत्रूणामाजयो युद्धानि येन तस्मिन् । अनीके समरे प्राप्त गवि पराह्वानरूपायां वाचि विगदं स्वान्तज्वररहितं के नाम भटा योद्धारो न केऽपि सन्तीत्यर्थः । यान्तं गच्छतं तं यो योद्धा भटस्सन् कथमपि नतिं नम्रतां न एति न प्राप्नोतीत्यर्थः । अत्र तदर्थक एव प्रतिलोमश्लोकः ।

स यथा—

नतिमेति न योद्धा यो रोद्धारो विगदं गवि ।
निजिताजिनि तं यान्तं केऽनीके विदिते दिवि ॥३९॥

तुरङ्गपदं यथा—

बाला सुकालबाला सा कान्तिलालकलालिता ।
सस्वा सुतवती सारा दर्पिका व्रतगर्द्धित ॥४०॥

अस्यन्यासमाह—

क्रमात्पादचतुष्केऽस्य पङ्क्तिशः परिलेखिते ।
तुरङ्गपदयातेन श्लोकोऽन्य उपजायते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा–

बाला ललिततीव्रस्वा सुकला रागतर्पिका ।
सुदन्तिका बर्द्धिता वा-सा कालातललासका ॥

बालेत्यादि ॥ बाला षोडशवर्षदेशीया शोभनकृष्णकेशी कान्तिप्रदचूर्णकुन्तलशोभिता सस्वा आत्मसम्पद्युक्ता सुतवती पुत्रवती उत्कृष्टाभिमानात्मकशृङ्गारवती अभिलषितस्वविवाहादिव्रताकांक्षी अतस्तं भजस्वेति हृदये-इति शेषः । द्वितीयश्लोकार्थो यथा, ललितो मनोज्ञस्तीव्रः प्रवीणः स्वः आत्मा यस्याः । रागेणप्रेम्णा तर्पयति या सा । सुदन्तिका शोभनदन्तयुक्ता बर्द्धिता बर्द्धनशीला वासा सम्पूर्णीकृतसकलस्थाना कालो मृदाव्याहार स्तेन सह वर्त्तते या तल लासका नृत्तका यस्याः सा तथाभूता अधःकृतसकलनर्त्तकलोकेत्यर्थः । एवम्भूता सा बाला प्रमदा त्वया उपभुक्तेति वाक्यार्थः ॥४०॥

आहुरर्द्धभ्रमं नाम श्लोकार्द्धभ्रमणं यदि ।
तदिष्टं सर्वतोभद्रं सर्वतो भ्रमणं यदि ॥

तयोरर्द्धभ्रमं यथा–

ससत्वरतिदे नित्यं सदरामर्षनाशिनि ।
त्वराधिककसंनादे रमकत्वमकर्षति ॥४१॥

ससत्वेति ॥ ससत्वानां सत्ववतां रतिदे रागप्रदे नित्यमजस्रं सदराणां सभयानाममर्षनाशिनि क्रोधहारिणि त्वरयोत्साहेनाधिकं ककसन्तो विकसन्तो नादा यत्र तस्मिन् । रमयतीति रमकः । (रम धातोर्वुष्) तस्याकादेशस्तद्भावो रमकत्वं रणकर्म्मणापररञ्जकत्वमकर्षत्यपनुदति । वीराणां परस्परमुत्साहं रणकर्म्मणास्फोरयतीत्यर्थः ॥ ४१ ॥

सर्वतोभद्रम्–यथा–

देवाकानिनि कावादे वाहिकास्वस्वकाहि वा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काकारेभभरे काका निस्वभव्यव्यभस्वनि ॥ ४२ ॥

॥ सर्वतोभ्रमणात्सर्वतोभद्राख्यश्चित्रबन्धः ॥

देवेति ॥ देवानाकनयत्युद्दीपयति–उत्साहयतीति देवाकानि तस्मिन् देवाकानिनि । कन दीप्तावितिधातोरार्यन्ताण्णिनिः । कावा ईषद्वादो वाक्कलहः । ईषदर्थे–इति कुशब्दस्यकादेशः । तद्वति का वादे । "अर्श आदिभ्योऽच् ।" वाहिका पर्य्यायेण रणभारोद्वहनम् वहेः पर्य्यायेण धात्वर्थनिर्देशे एवुल्वक्तव्यः । वाहिकया क्रमप्राप्तरण क्रियया सुष्टुशोभनं यथा तथास्वकान्परानाजिहीतेऽभियुङ्क्ते योज यतीति यावत् । वाहिकास्वस्वकाहास्तस्मिन् । योद्धृधर्म्मो युद्ध उप चर्य्यते । ओहाङ् गताविति धातोर्विच्प्रत्ययः । सोमपाशब्दवत्प्रक्रि याज्ञेया । वा शब्दश्चार्थे । कं मदोदकमाकिरन्तीति काकारा मदस्रा विणः । किरतेराङ्पूर्वकात्कर्म्मरायण् । एवंविधा इभभरा गजघटा यत्र तस्मिन् काकारेभभरे । काका इव काका गर्त्या इतिलक्षणया तेषामामन्त्रणम् । निस्वा निरुत्साहा भव्याः सोत्साहस्तानुभयान व्ययन्ति सवृणवन्तीति निस्वभव्यव्याः व्यञ् संवर्णे "आतोऽनुपस र्गेकः । तैर्वभस्ति भासते इति निस्वभव्यव्यभस्वास्तस्मिन् (अन्ये भ्योऽपि दृश्यन्त इति क्विप्) ॥

यथाह दण्डी–

तदिदं सर्वतो भद्रं भ्रमणं यदि सर्वत इति–उद्धारस्तु चतु ष्कोष्ठे चतुरङ्गबन्धक्रमेणाद्यपङ्क्तिचतुष्टये पादचतुष्टयं विलिख्यान न्तरपङ्क्तिचतुष्टयेऽप्यधः क्रमेणपादचतुष्टयलेखने प्रथमासु चतसृषु पंक्तिषु पथमः प्रादः सर्वतो वाच्यते द्वितीयादिषु द्वितीय इ त्यादि ॥ ४२ ॥

बन्धचक्रेषु द्विचतुष्कचक्रबन्धो यथा–

जय देव नरेन्द्रादे लम्बोदर विनायक ।
जगदेधनचन्द्राभालङ्घिदन्त विभायते ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्य न्यासमाह–

इह शिखरसन्धिमालां विभृयादर्द्धे समाश्रितैर्वर्णैः ।
द्विचतुष्कं चक्रबन्धे नेमिविधौ चापरं भ्रमयेत् ॥

जय–इति । नता इन्द्रादयो यस्मै स तथा जगतामेधनवर्धन-चन्द्राभा लङ्घिनी चन्द्रकान्तिविजयिनी दन्तप्रभाणामायति र्यस्य स तथा ॥ इहेति ॥ शिखरमालां सन्धिमालां च पूर्वार्द्धवर्णैः क्रमेण विभृयात्पूरयेत् । नेमिविधौ चापरमुत्तरार्द्धं भ्रमयेत् । द्वे शृङ्गाटके मिथो वैपरीत्येन यत्र शिखरं द्विशृङ्गाटकम् ॥ ४३ ॥

द्विशृङ्गाटकबन्धो यथा–

करासञ्जवशे-शंखगौरवस्य कलारसम् ।
सन्धाय वलयांशंकामगौरीं मे वनात्मक ॥४४॥

अस्य न्यासमाह–

शृङ्गाद्ग्रन्थिं पुनः शृङ्गं ग्रन्थेः शृङ्गं व्रजेदिति ।
द्विशृङ्गाटकबन्धेऽस्मिन्नेमिः शेषाक्षरैर्भवेत् ॥

॥ अत्राङ्के राजशेखरस्य ॥

करेति ॥ करैः किरणैः आसञ्जयतीति करासञ्जस्तात्सम्बुद्धौ । खे व्योम्नि गौरवं गुरुत्वं यस्य स तथा बनात्मक जलस्वरूपचन्द्रक-लासुरसमनुरागं सन्धाय कृत्वा । अन्तः स्वच्छतया दृश्यनभो भा-गनेमि मद्वलयाकारोल्लेखिनीं मे मम–अगौरीं श्यामां शङ्कामपनय । स्य इति क्रियापदम् । पूर्णोभवेदिति यावत् । वशेशम् आयत्तशङ्कर मिति क्रियाविशेषणम् । न्यासमाह–शृङ्गादिति । शेषाक्षरैरिति । आघात्ककारादारभ्य यावत्समाप्ति शेषाणि अक्षराणि तैर्नेमिरिति न्यासः । अत्र ग्रन्थिवर्णैरेव राजशेखरस्य इति नामाङ्कवर्णावली लभ्यते ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विविडितबन्धो यथा–

सा सती जयतादत्र सरन्ती यमितात्रसा ।
सारं परं सच जयी शमिताऽस्यन्दनैनसा ॥ ४५ ॥

अस्य न्यासमाह–

शिखरादन्यतमाद् वै प्रतिपर्व भ्रमति रेखयार्द्धम् ।
नेमौ तदितरमर्द्धं विविडितचक्राभिधे बन्धे ॥

सेति ॥ सा प्रसिद्धानुभावा सती गौरी सरन्ती निरर्गलप्रसरा न त्रस्यति–इति–अत्रसा अस्यन्दनेन स्थिरेण–एनसा कलमषेण शमिता रहितेत्यर्थ । अत्र जगति परं सारं यं भगवन्तमिता सङ्गता सच जयी महेश्वरो जयतादिति ॥ विविडितबन्धस्तु पञ्चाष्टङ्गचक्रम् । तद्देवताज्ञाये दर्शितम् ।

कर्पूरकुन्तगौरीं तनुमतनुकार्मूकभ्रूकाम् ।
वरदानसुन्दरकरां विविडितचक्रस्थितां वन्दे ॥ ४५ ॥

शरयन्त्रबन्धो यथा–

नमस्ते जगतां गात्र सदानवकुलक्षय ।
समस्तेऽजसतां नात्र मुदामवन लक्षय ॥ ४६ ॥

अस्य न्यासमाह–

चतुर्ष्वपि च पादेषु पङ्क्तिशो लिखितेष्विह ।
आदेरादेस्तुरङ्गस्य पादैः पादः समाप्यते ॥

नमस्त इति ॥ जगतान्नाम रूपप्रपञ्चस्य गात्रभूतदानवकुलक्षयेण स हि मुदां हर्षाणां रक्षक अज विष्णोऽत्र जगति सतां सज्जनानां मध्ये न कोऽपि ते तव सभस्ता लक्षय दृकपातेन अनुगृहाण मामिति शेषः न्यासश्लोकस्य स्पष्टार्थो बोध्यः ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्योमबन्धो यथा-

कमलावलिहारिविकासविशेषवहं जनकाङ्क
ननगामिकरं दिविसारमनारमणं जरतां न ।
तमसां बलहानि विलासवशेन वरं जनकान्तं
न नमामि चिरं सवितारमनादिमहं जगतां न ॥
अष्टादशशिखरचरीं गोमूत्रिकया चतुष्पदीं पश्येत ।
यत्राद्यंतैर्दृष्टां स ज्ञेयो व्योमबंध इति॥इतिन्यासः।४७॥

कमलेति ॥ कमलावलिहारिविकासविशेषवहं कमलानाम्पद्मानामवलिषु पङ्क्तिषु-इतियावत्-हारी मनोज्ञो यो विकाशविशेषः कान्त्यातिशयस्तस्य वहं वोढारं जनकाङ्क जनैर्लोकैस्तुल्यं तदीयङ्क शिरस्तत्राङ्कचिह्नभूत न नगामि करं किन्तु विसृत्वरकिरणमेव दिवि वैमानिकपथे सारभूतं जरतां वृद्धानामनारमणं न किन्तु प्रीतिकरमेव तमसां बलहानौ यो विलासवशः सन्ततो व्यापारस्तेन वरमुत्कृष्टं जनकान्त लोकहृदयङ्गम जगतामनादिं न किन्तु आदिमेव एवंविधं भगवन्तं सवितारं सूर्य्यमहन्न नमामि किन्तु नमाम्येव ॥ न्यासमाह । अष्टादशेति । आद्यन्तैर्दृष्टामिति । पदाद्यन्तवर्णयोरैक्यादितिबोध्यम् ॥४७॥

मुरजबन्धो यथा-

सा सेना गमनारम्भे रसेनासीदनारता ।
तारनादजना मत्ताधीरनागमनामया ॥४८॥

अस्य न्यासमाह-

अत्र पादचतुष्केऽपि क्रमशः परिलेखिते ।
श्लोकपादक्रमेण स्याद्रेखासु मुरजत्रयी ॥

सेति ॥ अनारता अविच्छिन्नप्रहरणव्यापारा आसीत् । मत्तधीरनागमिति क्रियाविशेषणम् । रसेन वीररसेनेत्यर्थः । तारनाद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जना महाप्राणशब्दजना । अत्र न्यासमाह । अत्र पादेति । अत्र पुटचतुष्ककल्पनया मुरजत्रयोन्मेषः ॥४८॥

एकाक्षरमुरजबन्धो यथा-

सुरानन त्वां न न हाननष्टये पुनस्तुवेऽनर्घ धनप्लवाननम् ।
मनस्यनूनप्रधनप्रधूननं सकाननस्थाननदीननर्दनम् ॥४९॥

अस्य न्यासमाह-

श्लोकस्यैतस्य पादेषु लिखितेषु चतुर्ष्वपि ।
त्रिमृदंगकरीह स्याच्चतुरेकाक्षरावली ॥

सुराननेति ॥ हे सुरानन । सुराणाममराणामाननम्मुखं तत्सम्बुद्धौ (अर्थात्) हे अग्ने-इत्यर्थः । हाननष्टये हानिनाशाय न न स्तुवे किन्तु स्तौम्येव । पुनरिति देवतान्तरव्यावृत्तौ स्तुत्यावृत्तौ वा । अनर्घे धनौघप्राणने यस्मात् । अन प्राणने-इत्यनुसारात् । प्रणतानां मनसि यदूनमनादिभवपरम्परानुपाति प्रधनं व्यसनं तस्य धूननं प्रतिक्षेपकं सकाननेषु वनगहनेषु स्थानेषु नदीनस्य पयोराशेरिव नर्दनं कोलाहलो यस्येति । न्यासमाह श्लोकस्य एतस्येति । प्रथमपादस्थादक्षरादारभ्य चतुर्थपादस्थमक्षरं यावदेकजाती याक्षरचतुष्कावलीं गृहीत्वा परावृत्य तज्जातीयानामेव चतुष्टयी गृह्यते । तेनैक मुरजोन्मुद्रणमपरत्रापि अनेनैव प्रकारेणात्रोदाहरणे-एकाक्षरमुरजत्रयी भवतीतिन्यासार्थः ॥ ४९ ॥

मुरजप्रस्तारो यथा-

तालसारप्रभा राका तारकापतिदंसिता ।
मारधामा रमाधीतबलयामास सागरम् ॥ ५० ॥

अस्य न्यासमाह-

क्रमेणैवास्य पादेषु प्रस्तेषु चतुर्ष्वपि ।
तुर्य्यान् मुरजमार्गेण श्लोकोऽयमुपजायते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाहि–

वरकारप्रदं धीरं तारधामाऽसमासिका ।
सा लतामालया माप तारा भातिरसागता ॥

तालसारेति ॥ तालसारप्रभा तालस्य तालवृक्षस्य यत्सारं खाद्यभागस्तत्प्रभेव प्रभा यस्याः । राका पूर्णिमा । तारकापतिर्दंसिता तारकाणाङ् ग्रहाणां पतिश्चन्द्रस्तेन दसिता कवलिता । मारस्य कामदेवस्य धाम स्थानं यत्र । रमया लक्ष्म्याऽधीताऽभ्यस्ता सलक्ष्मीकेत्यर्थः । वलयामास चालितवती बलवन्तं वा चकार । विन्मतोर्लुगित्यनुशासनात् ॥

वरकारेति ॥ वरकारप्रदं वरस्य–ईप्सितस्य वस्तुनः कारः करणं तत्प्रदं । धीरं गम्भीरं । तारधामा तारं दीप्तं धाम कान्तिर्यस्याः सा । असमासिका–असमा अनन्यसाधरणी आसिका स्थिति र्यस्याः सा नायिका लतामालया सङ्केतलतामण्डपेन अमौसार्द्धमापप्राप्तवती । तारा रोहिणीप्रभृतिस्तदात्मा । तारैर्निर्मलमौक्तिकैर्वा भाति या सा । अतिरसागता–अतिशयतेन रसेन पूर्णा उपगता सङ्गता । प्रकृतोदाहरणेऽष्टाक्षरप्रस्तावान्तः पाती यः प्रकारस्तदन्तः पाती मुरजाकृतिर्लभ्यते ॥ क्रमेणैवेति । तुर्य्याच्च पादप्रथमाक्षराद् उपक्रमे येन येन मार्गेण मुरजाकृतिर्लभ्यते । तेनायमपरश्लोकोभवति ॥ उर्ध्वलिखितवरकारप्रदमिति निस्सरतीति यावत् ॥ ५० ॥

उदाहरणमात्रञ्चैतत् । तेन गतिचित्रादिगोमूत्रिकादयोऽन्येऽपि चित्रप्रकारा भवन्ति ॥

गतिरुच्चावचा यत्र मार्गे मूत्रस्य गोरिव ।
गोमूत्रिकेति तत् प्राहुर्दुष्करं चित्रवेदिनः ॥

तेषु पादे गोमूत्रिका यथा–

काञ्चङ्न् पुलोमतनया स्तनताडितानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वक्षः स्थलोच्छ्रितरयाञ्चनपीडितानि ॥
पायादपायभयतो नसुचिप्रहारी ।
मायामपास्य भवतोऽम्बुसुचां प्रसारी ॥५१॥

॥ सेयमयुग्मतः पादगोमूत्रिका ॥

ननु यावदुदाहृतमेव किं गत्यादिचित्रं तथा सति किं गोमूत्रिकादीनां पृथग्भागविभागव्याहतः स्यादित्यत आह । उदाहरणमात्रं चैतादिति । गतिः पठति सञ्चारो वर्णानामुच्चावचं वा ऊर्ध्वाधःपर्य्यायेण प्रवृत्ता । काङ्क्षान्निति ॥ मायां संसारबन्धनमपास्य दुःखभयात्पायादिति सम्बन्धः । न्यासो यथा । अयुग्मतः प्रथमात्तृतीयाच्च उपक्रम्य द्वितीयचतुर्थपादसन्दंशेन गोमूत्रिकया प्रथम द्वितीययोस्तृतीयचतुर्थयोश्च परस्परसुन्मेषणमितीयमयुक्पादगोमूत्रिका ॥५१॥

युग्मतो यथा—

देवः शशाङ्कशकलाभरणः पिनाकी ।
देयः शमैकविकलेभरणः सनागः ॥
चित्ते महासुरजनेन शुभं विधत्तां ।
चित्तं महासुरजनानतभङ्गधन्वा ॥५२॥

देव इति ॥ महासुरजनेन ब्रह्मादिना चित्ते स्वान्ते शशाङ्कशकलाभरणः—चन्द्रखण्डभूषणः । शमैकविकलेभरणः शमेनैकेन विकलीकृत इभरणो गजासुरयुद्धं येन सः । महासुरजनानतभङ्गधन्वा सनागो देवः (एतादृशः) पिनाकी महादेवः शुभं कल्मषरहितं चित्ते चित्तं निधत्तामविशेषेण संसारिणामेव । अत्र पूर्ववत्समपादमुपक्रम्य विषमपादसन्दंशेन समाप्तिरिति निशेषस्तेनेयं युक्पादगोमूत्रिका ॥५२॥

अर्द्धश्लोकगोमूत्रिका यथा—

चूडाप्रोतेन्दुभागद्युतिदलिततमस्कन्दलीचक्रवालो ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवो देयादुदारं शममरजनतानन्दनोऽनन्यधामा ॥
क्रीडाधूतेशभामा द्युसदनतनिमच्छेदनी च भ्रुवानो
देहे देवी दुरीरं दममरतनतानन्दिनोमान्यधामा ॥५३॥

चूडेति ॥ इन्दोर्भागः खण्डं शंकल्याणम् अमरजनता देवसमूहो नास्ति अन्यद्धाम स्थानं यस्य सोऽनन्यधामा स्वात्माराम इत्यर्थः । न परं देवो देवी च । भ्रुवा भ्रूक्षेपेण दुरीदरं दुरपनयं नोऽस्माकं देहं दमं देयादिति सम्बन्धः ॥ धूते शुभामाप्रणयेन अपहृतपरमेश्वरप्रणयरोषा । भाम क्रोधे-इति धात्वनुकूलात् । द्युसदना देवाः । अरतमविश्रान्तं नन्दिना नता उमा गौरी अपूर्वं धाम तेजो यस्याः ॥५३॥

श्लोकगोमूत्रिकायां प्रथमश्लोको यथा-

पायाद्वश्चन्द्रधारी सकलसुरशिरोलीढपादारविन्दो
देव्या रुद्धार्द्धभागः पुरदनुजदवः स्त्यानसंविन्निधानम् ।
कन्दर्पक्षोददक्षः सरससुरवधूमण्डलीगीतगर्वो
दैत्याधीशांधकेनानतचरणनखःशङ्करो भव्यभाव्यः॥५४॥

पायादिति ॥ चन्द्रधारी मूर्ध्नि-इति शेषः । सकलसुरशिरोलीढपादारविन्दो निखिलदेवताशिरोव्याप्तचरणारविन्दः । देव्या गौर्या अङ्गीकृतार्द्धभागः । पुरदनुजदव पुराख्यदानवस्य दवो दवाग्निः । स्त्यानसंविन्निधानम्-स्त्यानायाः घनाया संविदो निदानम् । अजहल्लिङ्गत्वान्नपुंसकत्वम् । कन्दर्पक्षोददक्षः कामदेवपेषणसमर्थः । सरससुरवधूमण्डलीगीतगर्वः सश्रृङ्गारदेववधूटीसमूहैर्गीतपराक्रमः। दैत्याधीशेन अन्धकेन आनतचरणनखः-नम्रचरणनखः । भव्यभाव्यः-भव्यानामुत्तमानां भाव्योध्येयः (एतादृशः) शं कल्याणं करे हस्ते यस्य सः । वो युस्मान् पायाद्रक्षादिति ॥५४॥

द्वितीयो यथा-

देयान्नश्चण्डधामा सलिलहरकरो रूढकन्दारविन्दो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देहे रुग्भगङ्रागः सुरमनुजदमस्त्यागसम्पन्निधानम् ।
मन्दं दिक् क्षोभदश्रीः सदसदरबधूखण्डनागीरगम्यो
ऽदैत्येधीबन्धहानावततरयनयः शम्परो दिव्यसेव्यः॥५५॥

देयान्निति ॥ रुढकन्दानि अरविन्दानियस्मात् प्रणतानां रुग्-नुरागो यस्य सः । सुराणांमनुजानां च दमम्लूस्तान् दमतीति वा । त्यागसम्पदो निधानमाश्रयो दिशां क्षोभदायिका श्री र्यस्य । सदे-उपवने सदरा सभया या बधूः–तदीयानां खण्डनगिरां निर्भर्त्सन-वचसामविषयः । अदैत्येहीनदैत्ये धीबन्धहानाय संसारबन्धवि-च्छित्तये विस्तीर्णरयो नयो यस्य शं सुखं पिपर्त्तिं पूरयतीति शम्प-रः। दिव्यैः सेव्यश्चेति (एवं विधः) चण्डधामा रविर्नोऽस्माकं देहे भद्रं कल्याणं दयादित्यर्थः ॥५५॥

विपरीतगोमूत्रिकायां प्रथमः श्लोको यथा–

विनायकं दानसुगन्धिवक्त्रं स्मिताननं मन्दचरं कथासु ।
नमामि विघ्नावलिहारिसारं सतीसुतं शंकरबल्लभञ्च ॥५६॥

विपरीतश्लोको यथा–

चलल्लतालब्धशमं सुभासं संसारहारं बहुविप्रमान्यं ।
सुधाकरं चन्द्रमसं नतोऽस्मि सवर्णगर्भं नवकम्बुनाट्यम् ॥५७॥

विनायकमिति ॥ मन्दचरं मदालसगमनं कथासुभक्तदेवानां वार्त्तासु महाशयतया स्मेराननम् । विघ्नपरम्पराहरिणाञ्च सारमु-त्कृष्टम् । चलन्तीनां लतानामारब्ध सन्त्वनं येन बहुविप्रमान्यं द्विज-राजशेखरत्वात् । समानवर्णमध्यगं नवेन कम्बुनाट्यमुपचितम् । आद्यश्लोकस्याधस्ताद्विपरीतो द्वितीयश्लोकोलेख्यः ततः क्रमगोमू-त्रिकाया परस्परोल्लेखः ॥५७॥

भिन्नच्छन्दोगोमूत्रिकायां प्रथमश्लोको यथा–

नमत चन्द्रकलामयमण्डनं नगसुताभुजसंगतकन्धरम् ।
हरमभाग्यरदं स्तवसादरं शमितरावणशासनविक्रमम् ॥५८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयश्लोका यथा–

कामदं चण्डकन्नं मदामर्दिनं नागदन्ताज्यजय्यं गदाकर्बुरं ।
धीरशोभाभरव्यस्तकंसासुरंनौमिनारायणस्यासमंविभ्रमं५९

संस्कृतप्राकृतगोमूत्रिकायां संस्कृतश्लोको यथा–

स्कन्दो रुन्दर्द्धिमिष्टां वितरतु सरलो दारितारातिवर्गे
सस्यन्दोऽमन्दसज्जो भवभयकलने संगरे केलिकारी ।
सन्दोहोल्लाघलासी जन इह बलिहा चण्डताभूरखर्वो
देवौजोराजदोहे महिमनि निरतो विक्रमाड़म्बरेण ॥६०॥

प्राकृतश्लोको यथा–

चन्दो कन्दप्पमित्तं विहरणसहलो हारितारापबन्धो
सच्छन्दो बन्दणिज्जो कुवलयदलनो संकरे मेलिकारी ॥
कन्दोट्टोल्लासलासी ज अइ सिवसिहामण्डलीभू अखण्डो
देत्ता जोणूहा जलोहे विहि अणि अरई विब्भमाणं वलेण ६१

समसंस्कृतप्राकृतेन पादगोमूत्रिका यथा–

बाला विलासावलिहारिहासा लोलामला भावसहा सहावा।
देहं रहन्ती सरसा सुरामा गेहं चरन्ती सहसा भिरामा ॥६२॥

अर्द्धगोमूत्रिका प्रस्तारो यथा–

नमो दिवसपूराय सुतामरसभासिने ।
नतभव्यारिदाराय सुसारलयभाविने ॥६२॥

अत्र गोमूत्रिकाश्लोकोऽयमुत्तिष्ठति–

नतदिव्यासदाराय सुसा मलसभासिने ।
नमो भवरिपूराय सुताररयभाविने ॥

अभाग्यस्य रदं निलेखकं नाशकमिति यावत् । कामदं वाञ्छितप्रदं चण्डमुग्रं कन्नं कमनीयञ्च परेषां दर्पमर्दनशीलं नागस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालियाख्यस्य दष्ट्राभिः कुवलया पीडाख्यस्य हस्तिनो वा विषा-
णाभ्यां या आजिः सङ्ग्राम स्तत्र अजय्यं जेतुमशक्यम् । गदया
नानारत्नखचितया कर्बुरं चित्र मिति यावत् । स्फन्दः कार्त्तिकेयः ।
रुन्दां विपुलां दारिते शत्रुसमूहे सस्यन्दः स्फुरद्रूपामन्दः स्वास्थ-
चित्तः + भवभयस्य संसारत्रासस्य कलने क्षपणे-इह जने मृत्युलोके
सन्दोहेन य उल्लाघः सामर्थ्यं । निरोगत्वात्तेन लसनं शीलः बलिनां
हन्ता । चण्डताया स्तैक्ष्ण्यस्य भूराश्रयोऽखर्बः सर्वेषामुपरिवर्त्त-
मानः देवौजसां राज्ञां खण्डयित्री रेहाचेष्टा यत्र तादृशे महिम्नि
निरतो विहरणे सञ्चरणे सफलः । उद्भूतः शुभाशुभसूचकत्वात् ।
मेलिकारी सङ्गमकरी चूडामणित्वात् । ऐक्यकारी वा तन्मूर्त्तित्वात् ।
कन्दोद कुमदमिहाभिमतं ताद्धिकाशन चलनशीलो ज्योत्स्ना जलौ-
घान् ददत् । विभ्रमाणं बलेन विहिता जिन-आत्मनि रतिर्येन स
तथा । बिलासा बलिषु हारी विकाशो यस्याः लोला चला अमला
निर्मला भावाननेकविधान या सहते सा भावसहा । हावः क्रीडा-
विशेषोः दिवसान् पूरयतीति दिंवसपूरा तस्मै सुष्टु तामरसेषु
भासनशीलायाः । नता भव्या यस्मै-अरीन्दारयतीति-अरिदारः
ततः कर्म्मधारयः । नतानां भव्यानामरिदारेति वा । नता भव्या
अरिदारा अस्मिन्निति वा सुष्टु सारो लयस्तत्र लपनं तं भावयती
यस्तस्मै । नता दिव्या देवा यस्मै । असदविद्यमानमरि चक्रं यस्य ।
ततः कर्म्मधारयः । शोभनानां साम्नां लसनेन भासनशीलाया
भानि नक्षत्राण्यावरितुं शीलं यस्यैति भवरि-आकाशंपूरयति व्या-
प्नोति एवम्भूताय । सुष्ठतार उच्छ्रितो यो रयो वेगो गमनं तेन
भाविने ॥ ५६।५७।५८ ५९।६०।६१ ॥ इति ॥

॥ समाप्तोऽयं चित्रभागः ॥

नेत्राश्वाङ्कशशाङ्कविक्रमयुते शुक्रे सिते दिक्तिथौ ।
गौरीजान्यनुकम्पया शुभदिने भौमे शुभर्क्षे मया ॥
बालानां हितचिन्तके प्रतिदिनं यन्त्रालये काशिके ।
टीकेयं हि प्रकाशिता मतिमतां हर्षाय विश्वम्भरे ! ॥ १ ॥

शुम्भूयात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथमाष्टदलकमलबन्धः २७



द्वितीयाष्टपत्र बन्धः । २८



तृतीयाष्टपत्रबन्धः । २९



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुष्पत्र कमल बन्धः । ३०



षोड़शपत्र कमल बन्धः । ३१



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टदल कमल बन्धः। ३२



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षड्र चक्र बन्धः । ३३



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयषड्रचक्रमन्त्रः । ३४



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुरङ्गपदबन्धः ।

वा १	ला३०	सु८	का२०	ल३	वा२४	ला११	३२६
का१६	क्ति१८	ला २	ल२८	क१०	ला२७	लि ४	ता२३
स३१	खा८	खु१७	त१४	व२१	तो६	सा२५	रा१२
द१८	र्पि१५	का३२	व्र ७	त२८	ग१३	द्धि२२	त ५

अर्धभ्रमकः ४१

स	स	त्व	र	ति	दे	नि	त्यं
स	द	रा	म	र्ध	ना	श्रि	मि
त्व	रा	धि	क्ष	क	सं	ना	दे
र	म	क	त्वं	म	क	र्ध	ति

सर्वतोभद्रचक्रबन्धः । ४२

दे	वा	का	नि	नि	का	वा	दे
वा	हि	का	स्व	स्व	का	हि	वा
का	का	रे	भ	भ	रे	का	का
नि	स्व	भ	व्य	व्य	भ	स्व	नि
नि	स्व	भ	व्य	व्य	भ	स्व	नि
का	का	रे	भ	भ	रे	का	का
वा	हि	का	स्व	स्व	का	हि	वा
दे	वा	का	नि	नि	का	वा	दे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विचतुष्कचक्रबन्धः । ४३



द्विअष्टकोणचक्रबन्धः । ४४



विविधित चक्रबन्धः । ४५



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शर यन्त्र बन्धः । ४६

न१	१८म	स्ति३	ज२०	ग५	त्रुं२	०गु	व२४
स२	२६ह्रा	न११	र्व	कु१३	ल	स्वे	२२य
स७	स२	स्ति२	जँ	स्व	तांध	२३ना	ल८
गुं२४	ह्रा०	मै७	व१७	नै	ल	स्व	१६य

व्योम बन्धः । ४७



(मुद्रक अलीबाबा प्रेस बनारस)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुरजबन्धः ४-८



एकाक्षरमुरजबन्धः ४९



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुरजप्रस्तारः ५०



पादगोमूत्रिकाबन्धः



अर्द्धगोमूत्रिकाबन्धः ६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu